This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पार्श्वलअंक	शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
M-2567	~~कण्वशाखीयांपुरुषांप~~ ~~शिशिर~~	—	वैदिक	अपूर्ण	—	3/6	18	संस्कृत	कागज	~~14~~ 10	~~33~~ 34		

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥श्रीकण्वशाखिनांपूंसोपरिशिष्टं विलिख्यते॥यदनुष्ठानमात्रेण
मुच्यतेसर्वपातकैः॥१॥अथगंगायमुनागोदावरीप्रभृतिमहानद्यांप्रातरादौकण्व
शाखिभिःसूर्याभिमुखंविधिनाप्रातस्नानादिकार्यं॥नतुप्रवाहाभिमुखंस्नानं॥
यतःकात्यायनाचार्यः॥अथातोनिःसरस्नानंनद्यादिष्वारभ्यआपोअस्मानितिऋचा
आदित्याभिमुखमुन्मज्जेदितिविधिंदर्शयांचकार॥नचगंगामूलादेरभ्यर्हितत्वे
नप्रवाहाभिमुखंस्नानंगंगादौप्रशस्ततरमितिवाच्यं॥काण्वादिपंचदशशाखि
भिन्नशाखिनांब्राह्मणानांगंगादौप्रवाहाभिमुखस्नानस्यप्रशस्ततरत्वेपिकाण्वा
दिपंचदशशाखिनांब्राह्मणादीनांगंगादौसूर्याभिमुखस्नानस्यैवअभ्यर्हितत्वात्॥
सूर्याभिमुखमुन्मज्जेदितिविधिपरिपालनात्॥विहितस्याऽननुष्ठानान्निंदित
स्यचसेवनात्॥अनिग्रहाच्चेंद्रियाणांनरःपतनमृच्छतीतियाज्ञवल्क्यस्मृत्यागंगा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दौकाण्वादीनां नवा हाभिमुखस्नाने पातकापत्तेः॥ अतएवोक्तं॥ यायासमुद्गानघ
स्नासुस्नानंतुतन्मुखं॥ सर्वेषांरविनांकार्येविनावाजसनेयिनः॥ इतिकण्वरवि
भिःसूर्योदयात्पूर्वंघटिकाद्वयमारभ्यसूर्योदयपर्यंतंमध्यमकालरूपानुदितकाले
औतस्मार्तश्रौतमंःकार्यःकण्वरविभिः॥ नचऋग्वेदब्राह्मणेअनुदितहोमनिंदा
पूर्वकमुदितहोमस्यव्यवस्थापनात्सूर्योदयानंतरंक्रीयमाणस्यप्रायश्चित्तहो
मेनतदानींप्रायश्चित्तिपूर्वकहोमकरणंअयुक्तमिवभासतइतिवाच्यं॥ शतपथे
ब्राह्मणेएकधात्कांडेसूर्योहवाअग्निहोत्रमिसारभ्यमहताप्रबंधेनउदित
होमनिंदापूर्वकमनुदितहोमस्यव्यवस्थापितत्वेनअनुदितहोमिनामुदितहोम
प्रायश्चित्तमसत्कल्पातत्पूर्वकहोमकरणस्यावश्यकत्वात्॥ नन्वेवंप्रातर्होमस्य
ग्रहणाग्रहणन्यायेनउदिताऽनुदितकालयोर्विकल्पःप्रतीयतामितिवाच्यं॥ इष्ट्या
पत्तेः॥ नचैवंकदाचित्कण्वरविभिःउदयात्पूर्वंहोमःकार्यः॥ कदाचिदुदयात्पूर्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कदाचिदुदयानंतरंहोमःकार्यइतिविकल्पः॥एवंऋग्वेदिप्रभृतिभिःकदाचिदुद
यात्पूर्वंकदाचिदुदयानंतरंहोमःकार्यइतिविकल्पश्चप्रतीयतामितिवाच्यं॥व्यव
स्थितविकल्पांगीकारेणबाधकाभावात्॥काण्वादिपंचदशशाखिनःप्रतिअनुदि
तहोमस्यतदन्यऋग्वेदिप्रभृतिनःप्रतिचउदितहोमस्यव्यवस्थापनात्॥नचहोम
द्वयस्यापिनिंदितत्वेनसागरध्यतामितिवाच्यं॥तथासतिविधिवैय्यर्थ्यापत्तेः॥किंतु
नहिनिंदानिंदितुंप्रवर्त्तते॥स्तुत्यैस्तोतुंप्रवर्त्तेतिन्यायेनकाण्वादीन्प्रतिअनुदितहो
मस्यशतपथब्राह्मणेस्तुतत्वात्॥काण्वादिभिन्नऋग्वेदिब्राह्मणप्रभृतीन्प्रतितूदि
तहोमस्यऋग्वेदिब्राह्मणेस्तुतत्वादितिव्यवस्थापनाद्दृश्यन्यत्रविस्तरः॥कथंकण्वर्ष
भिर्वैश्वदेवःएकदाकार्यः॥वैश्वदेवस्यकात्यायनमतेनित्यकर्मरूपत्वेनसकृदनुष्ठा
नयोग्यत्वात्॥नित्यकर्मणांचसकृदनुष्ठानस्यलोकेदृष्टत्वात्॥नैवंसंध्यादिकंनित्यं
कर्मप्रतिपदिकमनुष्ठीयमानंदृश्यते॥अथकथंतर्हिनित्यसंध्यादिकंप्रातःमध्या
ह्नसायंकालेष्वनुष्ठीयतइतिचेन्नैवं॥प्रातर्मध्याह्नसायंकालेषुसंध्यानुष्ठानविधिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बलात्॥संध्यासूपनियकर्मणःकालत्रयाऽनुष्ठानसंभवेपिवैश्वदेवस्यकालद्वयाऽनुष्ठा
नसंभवाभावात्॥नहिसायंप्रातश्चवैश्वदेवःकार्यइतिविधिरुपलभ्यते॥नचाश्वल
यनसूत्रेसायंप्रातश्चसिद्धस्यहविषोजुहुयादितिसायंप्रातःकालीनवैश्वदेवविषयक
विधिरुपलभ्यतइतिवाच्यं॥तत्रआश्वलायनसूत्रिणःप्रतिसायंप्रातःकालीनवैश्व
देवविषयकविधेरुपलंभेपिकाण्वादीनप्रतिसायंप्रातःकालीनवैश्वदेवविधेरनुप
लंभात्॥अतएवकात्यायनाचार्यः॥सायंप्रातःशब्दरहिततया॥अथातःपंचमहाय
ज्ञानिस्तत्रेत्यभ्यांचकार॥एवंचकाण्वादिभिःपंचमहायज्ञातःपार्थिब्रह्मयज्ञवत्॥
तदंतपार्थियज्ञत्रयात्मकवैश्वदेवोपिसदैवकार्यः॥पंचमहायज्ञत्वघटकत्वाविशेषा
त्॥युक्तंचैतत्॥अग्निमानग्निमान्कुर्यादित्यस्तुप्रसंगसूत्रतइतिकात्यायनोक्तेः
अग्निमानाधानसंस्कारेणाग्निसहितः॥नतुसमोगादिसंबंधेनाग्निसहितः॥
गृह्याग्निमान्ब्राह्मणादिरितियावत्॥नैजेनिःनग्निः॥शंखादित्वात्प्रकृ
पं॥शंखंखदिरसखिगणत्वात्॥नग्निरस्यास्तीतिनग्निमानितियावित्यहः॥ॐ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैत्तिमानू। अ
नैत्तियमानः अग्निर्यस्यसः॥ नग्निमान्॥ परूपमार्षं॥ नञ्विकारस्य
अकारस्यलोपोवाआर्षः॥ आधानसंस्कारात्मकसंबंधावच्छिन्नप्रतियोगिताक
अन्यभावधानरसर्थः॥ निरग्निनश्रौतेणाग्निस्थितियावत्ते॥ नअग्निरियाग्नि
महःरंतंपूर्वलिखितमत्र॥ बहुव्रीहिमतुबंतयोःसमानार्थकयोनाश्रयेषात्॥ त
थाचगौसाग्निर्निरग्निर्वाब्राह्मणादिः॥ इमान्देवयज्ञभूयज्ञपितृयज्ञब्रह्मयज्ञ
मनुष्ययज्ञान्कुर्याद्[illegible]तिशेषः॥ एतेनप्रतिपाकंवैश्वदेवःकर्तव्यइतिवद
तःपरास्ता॥ ननुकण्वरक्षसांसत्रेवैश्वदेवकरणांगीकारेसायंकालेदेवान्प
क्केनान्नेनवैश्वदेवकरणासंभवात्तदन्नंतृष्णीमेवकण्वरक्षोभिर्भोक्तव्यंस्या
दितिचेन्न॥ पाककर्त्रीभूतपत्न्यादिकर्तृकमंत्ररहितएकबलिप्रदानपूर्वकतयापक्ष
स्यान्नस्यकाण्वादिभिर्भोक्तव्यात्॥ नचात्रार्थेमानाभावशंक्यः॥ सामंत्रेन्नस्यसिद्ध
स्यपत्न्यमंत्रंबलिंहरेत्तेतिव्यास्तस्मात्रमाणभूतायाःसकाशात्॥ अयंचवैश्वदेवःएकाद
श्यांपोषणादिवत्प्रत्यनुष्ठेयः॥ नित्यकर्मत्वात्संध्यादिवदितिवदंति॥ अयंवैश्वदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवयज्ञभूतयज्ञपितृयज्ञमात्मक॥तत्रदेवानुद्दिश्यअग्नौहूयमानःयःसदेवयज्ञः॥
भूतानुद्दिश्यभूमौयोबलिर्दीयतेसभूतयज्ञः॥यःपितॄनुद्दिश्यभूमौबलिर्दीयतेसपि
तृयज्ञः॥तत्रयज्ञत्रयमध्येदेवयज्ञःअग्नौकार्यः॥उर्वरितंयज्ञद्वयंअग्नेपभात्यथा
सूत्रंकर्पा॥तत्राऽयंविधिरेकः॥यदिवैश्वदेवकर्तागृह्याग्निमान्स्यात्तर्हिगृह्याग्नौदेव
यज्ञंकुर्यात्॥यदिचवैश्वदेवकर्तागृह्याग्निशून्यःनिरग्निर्भवेत्॥तदाएषोऽविधी
तिविधिनासंस्कृतेनौदेवयज्ञंकुर्यात्॥नत्यसंस्कृतेग्नावाज्याहुतिर्बोध्यं॥अतहत्पर
मेश्वरप्रीत्यर्थंएषोदिविधिनाअग्निंसंस्करिष्येतिसंकल्पयेत्॥तत्रपूर्वंअग्न
येनरक्षितमंत्रेणग्नावग्निमसंस्कृतमाहृत्यएषोदीतिमंत्रेणप्रतिष्ठाप्य॥समितमिति
द्वाभ्यांमंत्राभ्यांतमग्निमुपस्थापभूर्भुवस्वरितिमंत्रेणतमग्निंप्रज्वाल्य॥ताङ्सवितु॥तत्स
वितुर्वरेण्यं॥विश्वानिदेवसवितरितिमंत्रत्रयेणगृहीतेनसमित्रयेणतमग्निंसमिध्य
॥पुनस्त्वेतिमंत्रेणगृहीतयासमिधाऽपुनस्तमग्निंसमिध्य॥नमस्त्रूपूर्वंवन्मउल्लंघ्यत्या
दिनाग्नावाधायाऽऽज्यंतेःसायंप्रातर्होमोक्तस्तन्त्रेण॥ततोग्निकुंडात्पुरुषंकरीषंगृहीत्वाग्रामात्पश्चात्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीतत्राग्नेपक्वापुनर्महानसादुल्मुकनीयाकुंडस्थाग्निनामेलयेत्॥तत्रयथाविधि
देवयज्ञंकुर्यात्॥नतुलौकिकाग्नौ॥अस्मिन्नेवाग्नौपिंडपित्रयज्ञंपश्चाद्दर्भेआग्नेय
मंत्यकुर्यात्॥नस्थापाकंपचेत्॥नस्थापाकमश्नीयात्इतिकात्यायनस्मरणात्॥
स्थाआहरणादिहोमांतसंस्कारशून्येनाग्निनापाकंचि स्तिप्रतिस्त्रीअखिलावयवस्य
संयोगमितियावत्पचेत्॥वैश्वदेवशून्यमन्नेनाश्नीयात्॥नभुंजीतेतिशेषः॥अस्मि
न्नग्नौपाकाधिकारीकःइतिचेदुच्यते॥अनाहिताग्निः॥मृतपत्नीकः॥विच्छिन्नग्र
स्ताग्निः॥ब्रह्मचारी॥प्रवासी॥गृह्याग्निमान्श्रौतस्मार्तकर्माधिकारी॥एतेष्वन्यत
मेनकर्त्राधिकारिणाआहरणादिहोमांतसंस्कारशून्यंस्वामाग्निनापाको
नकार्यः॥वैश्वदेवेनहीनमन्नंचनभोजनीयं॥इतेतावताम्रबंधेनप्रपंचितं॥इदंशेन
कर्त्राद्यस्मार्तेनापराग्निपक्वमन्नादिकंनभोक्तव्यं॥तदाह॥परानिपक्वंनाश्नी
याद्दिनातुगुडगोरसौ॥दर्शेचपौर्णमासेचतथान्यस्मिन्दिनेपवेतिकात्यायनोक्तेः॥गु
डगोरसाभ्यांविनापराग्निपक्वंनाश्नीयात्॥गुडगोरसाभ्यांपराग्निपक्वंतुअश्नीयाद्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्रीयाद्वा ॥ एवंदर्शेपौर्णमासेचपराग्निपक्वंनाश्नीयात् ॥ तद्दिनेरात्रेपराग्निकृत
श्नीयान्नवाश्नीयात् ॥ विकल्पोत्रअनाख्यायांबोध्यः ॥ दृष्टादिविधिनाप्रतिष्ठापि
तेग्नौधर्मेच्छुः ॥ नरग्निःकण्वादिब्राह्मणादिःदिनंदिनंसायंप्रातर्होमंकुर्यात्तदग्ना
ग्निप्रारंभपर्यंतंअस्याग्नेःप्रारंभश्चोदगयनेशुक्लपक्षेपुण्याहे कार्यः ॥ एवमेवहरि
हरभाष्यादौदृष्टव्यः ॥ अत्रैवाग्नेरुपाकर्मसीमंतादिकंकार्यं ॥ नच्चरुसाग्निभिन्नेऽ
ग्निकाग्नेरुपाकर्मणःनिषिद्धत्वेनकर्कभाष्यादौदुपालंभात् ॥ कथमस्मिन्नग्नेरुपाक
र्मकर्तुमुचितमितिवाच्यं ॥ तत्रश्रुताग्निभिन्नउसंस्कृतेग्वामाग्निरूपेलौकिकाग्नावे
कउपाकर्मकरणस्यनिषिद्धत्वेपि ॥ आहरणादिसंस्कारहोमादिसंस्कारसंस्कृतेग्नेरुपाक
र्मादिविधुक्तेः ॥ उपाकर्मकरणस्यानिषिद्धत्वात् ॥ अतएवआकन्याकुमारीआहरणादे
शंपरलोकभीरवः श्रौतस्मार्तनिष्णातारःकर्मठाग्नेसराःश्रेष्ठतमाः आहरणादिहो
मांतसंस्कृतेनिरूढेग्नेरुपाकर्मकुर्वंति ॥ तस्मात्पृष्टादिविधिनाप्रतिष्ठितेग्नौ
उपाकर्मादिकंपापभीरुभिर्धर्मेच्छुभिःकण्वादिभिस्सुस्थेनकर्तव्यं ॥ अत्रकेचिन्माध्यं
दिनाःकर्मकर्तुमलसाः उपाकर्मकुर्वाणंमेधाब्राह्मणंनिंदंतःसंतःजल्पंति ॥ अस्य

॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीयश्च ऋयऋयजुर्वेदस्याग्नेयंसमयातयामत्वेनन्यातयामतारूपदोषप्रसक्तेरभावेनत
दोषनिरसार्थंउपाकर्मकरणंनास्माकंयोग्यमितिन्मौढ्यात्उपाकर्मकरणस्यात
यामतारूपदोषनिरसार्थमनपेक्षितत्वेपिईश्वराज्ञापरिपालनार्थंतैरूपाकर्मकरणस्या
वश्यमपेक्षितव्यंस्यात्॥अन्यथा॥कृष्णमाध्यंदिनादिउद्देश्यकोपाकर्मविधानेपारस्करा
चार्यप्रभृतेःवैय्यर्थ्यापत्तेरतःतदर्थमुपाकर्मकरणस्याप्यवश्यकत्वात्॥यत्तुमाध्यं
दिनाःकेचित्उपाकर्मत्यक्त्वाउत्सर्जनमात्रंकुर्वंति॥तदतिरभ्वीयःउत्सर्जनवत्उपा
कर्मणोपिसागायोगात्॥उत्सृष्टानामनुपाकृतानांवेदानांपुनरुत्सर्गासंभवेनतदुत्सर्ज
नस्यगगनकुसुमायमानत्वात्॥यद्दीपप्रकारदीक्षितप्रभृतयोवदंति॥प्रवासिनाग्नि
होत्रिणापर्वणिनदर्शनपक्वेनभोक्तव्यं परंतुपयोमूलफलादिहोमादिनाकालक्षेपः
कर्तव्यइतितान्निर्मूलं॥विनापाकःकार्यः॥वैश्वदेवंविनाभोजनंकार्यं॥नहिप्रवासिना
ग्निहोत्रिणाहोमेविनापाकःकार्यः॥एतच्चश्रौतंस्मार्तंपौराणिकंवाआहोस्विदभियु
क्तैर्यावचनमस्ति॥नवासघुक्किरस्ति॥एवंप्रवासिनाग्रसाग्निमता वैश्वदेवंवि
नाभोजनंकार्यमित्यत्रपर्वणिचएतल्लोदर्शीतिवैश्वमन्नंतेननभोक्तव्यमित्यत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौताद्यैकवचनमस्तिनवासपुक्तिरस्ति॥नचप्रवास्यग्निहोत्रिणाहोमंविनापाकः का
र्यस्यत्रश्रौताद्यवचनाऽनुपलंभेपिगृह्येसायंप्रातर्होमद्वयस्यपुत्रादिद्वाराजायमानतया
पुनरत्रसायंप्रातर्होमद्वयस्यपुनःकरणेप्रयोजनंनपश्यामस्तिसपुक्तिरस्ति॥एवंवैश्व
देवंतिनातेनभोजनंकार्यमितिसत्रश्रौताद्यवचनानुपलंभेपिगृह्येवैश्वदेवस्यपुत्रादिद्वारा
जायमानतयापुनरत्राग्नौवैश्वदेवसरणेवैश्वदेवद्वयापत्तावप्यस्मिन्दिनेतर्पणद्वय
स्येववैश्वदेवद्वयस्यापिनिषिद्धतयानिषिद्धस्यतस्यस्वीकारापत्तिरूपासपुक्तिरस्ति
तथापर्वणिपृष्ठोदितीतिकिंचिदासंस्कृताऽग्नावपक्वस्थानस्यप्रवास्यग्निहोत्रिणो
भोजनेपराग्निपक्वान्नाभीयात्तच्चनालंगुडगोरसौ॥दर्शेन्वपौर्णमासेचेतिनिषेध
रूपासपुक्तिरस्तीतिपक्षत्रयमपिसमीचीनमितिवाच्यं॥प्रवासिनोऽग्निहोत्रिणः
पुत्रादिद्वारागृह्याग्नौजायमानस्यसायंप्रातर्होमद्वयस्यनित्यकर्मरूपतयानित्य
कर्माकरणप्रयुक्तपापनिवारकत्वेपितस्यैवप्रवासिनःपाकारंभपक्षेपाकसाधनी
भूताग्नीयाहरणादिहोमांतसंस्कारपटकीभूतसायंप्रातर्होमद्वयरूपसंस्कारसं
पादकत्वानुपपत्तेः॥नहिग्रहणाभिधायमानेःसायंप्रातःकालीनोहोमःप्रवासिनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्निमतःपाकसाध्यनाभूतदेशांतरनिष्ठपृष्टौदिविधिबोधितआहरणादिहोमांत
संस्कारघटकीभूतनिरूक्तहोमद्वयरूपसंस्कारंसंपादयेत्॥गृह्याग्नेरीयमाण
स्यनित्यनिरूक्तहोमद्वयस्यगृह्याग्निनिष्ठत्वेनदेशांतरनिष्ठप्रवास्यग्निमत्पाकसा
धनीभूतपृष्टौदीतिसंस्कार्याग्निनिष्ठत्वाऽभावात्॥अन्यथागृह्याग्नेःआहरणादि
सर्वसंस्कारसंस्कृतत्वेनतेनैवसंस्कारजातेपृष्टौदीतिप्रतिष्ठाप्याग्निःसंस्कृतत्वेनते
नपाकसंभवेपाकार्थंपुनस्तदग्नेरन्यग्निरित्यादिनाआहरणादिहोमांतसंस्कारोपदेश
स्यानर्थक्यापत्त्याप्रथमपक्षस्यशोदक्षमत्वाभावात्॥एवंप्रवासिनोगृह्याग्निमतसु
त्राद्द्वारागृह्याग्नोगृहेजायमानेनवैश्वदेवेननित्यकर्मानुष्ठानसंभवेपिपृष्टौदी
तिविधिबोधितसंस्कारजातसंस्कृताग्निपक्वान्ननिष्ठत्वाभावेनतत्संस्कारासंपाद
कत्वेनद्वितीयपक्षस्याहेयत्वात्॥नचथाश्वीयादितिकात्यायनीयेभ्यः॥अतःआहरणा
दिहोमांतसंस्कारसंस्कृताग्निनापक्वेनान्नेनवैश्वदेवंसंपाद्यगृह्याग्निमताचिकीर्षि
तपाकेनभोक्तव्यंतदन्नमितिसिद्धं॥यत्तुनिरूक्ताग्निनापक्वमन्नंविधिपूर्वकपाकारंभ
स्वीकारिणापिगृह्याग्निमताप्रवासिनापर्वणिनभोक्तव्यमिति॥तत्तुरुं॥पाकस्थी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारपक्षेपर्वणिप्रवास्याग्निमतानभोक्तव्यमितिनिषेधानुपलंभात्॥प्रवसन्नग्निमा
न्विप्रःपयोमूलफलादिभिः॥कालंनयेदभोक्तृविधिनापाकमाचरेत्॥इतिकात्यायन
वचनेनशक्तिमतःप्रवासिग्रह्याग्निमतः॥पयोमूलादिना कालक्षेपस्यैकपक्षस्यशक्ति
मतःप्रवासिग्रह्याग्निमतो ब्राह्मणस्यविधिपूर्वकपाकारंभपक्षस्यपर्वणिनभोक्तव्य
मितिनिषेधरहितस्योपलभ्यमानस्यसलमसरावेशेनेतिदिक्॥अथकाण्वादीनांपर्व
णिनिर्णयोलिख्यते॥पर्वत्रह्विधं॥अमावास्यापौर्णमासीभेदात्॥तत्रचंद्रार्कयि
करणीभूतातिथिरमावास्येत्युच्यते॥यस्यांतिथौ॥अमासहवसतेः॥चंद्रोर्कौ॥साऽमा
वास्येतिव्युत्पत्तेः॥नचतर्हिअमावास्यदितिपाणिनीयसूत्रेणयत्रसूर्यांतरयानिपा
तनादमावास्याग्रहस्यसाधुत्वेपिअमावावास्याग्रहस्यासाधुत्वंवक्तव्यं॥अमा
वास्यदन्यतरस्यामितिपाणिनीयसूत्रे अन्यतरस्यामितिसूत्रस्यग्रहणेनवैकल्पिकस्य
यत्रसूर्यांतरस्यामावास्याग्रहस्यक्रतोर्यदितिपाणिनीयसूत्रानुशिष्टण्यंतस्य॥य
त्रसूर्यांतरस्यवसधात्रीयोपधार्थसहितस्यकादाचित्कस्यामावास्याग्रहस्यच
साधुत्वेलापनात्॥साचामावास्याद्विविधा॥मुख्यालाक्षणिक्याचेति॥तत्रदर्शे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुख्यामावास्या॥लाक्षणिकायामावास्यांप्रतिपत्॥तत्रअग्निहोत्रीकाण्वादिब्राह्मणः
पूर्वेद्युर्दर्शसंज्ञांअमावास्यांउपवसेत्॥अत्रद्वितीयायाःआधारत्वं॥आधेयत्वंवा॥उपा
न्वध्याङ्वसः॥इतिपाणिनीयसूत्रेणद्वितीयानिमित्तभूतकर्मसंज्ञायाःउपपूर्वकवस
धात्वर्थाधारकर्तृद्वारकस्यविधानात्॥एवंचपूर्वस्यामावास्यायांमन्त्रोधानपूर्व
कंसपत्नीकउपवसेत्॥लवणादिरहितंबहुघृतपक्वंहविष्यं॥स्त्रीयंअलंघयित्वाहवि
ष्यीयात्॥नचोपपूर्वकस्यवसतेरभुक्त्यर्थकत्वेनउपोष्येकादशींशुद्धांमित्यत्राभुक्त्य
र्थकत्वेनदर्शनात्॥कथमत्रवसतेरुपवसेरिदमस्यस्त्रीयाश्चनपरत्वंमितिवाच्यं॥वैकुंठमु
पवसन्तिहरिंरिसत्रोपपूर्वकवसतेरभुक्त्यर्थत्वादर्शनेनउपपूर्वकवसतेरभुक्त्यर्थ
कत्वंमितिनियमस्यव्यभिचारेणासंभवात्॥उपपूर्वकस्यवसतेःस्त्रीयाश्चनपरत्वेबा
धकाभावात्॥नचोपपूर्वकवसतेःस्त्रीयाश्चनपरत्वेसाधकाभावसंशयः॥सर्षि
षाऽसुहितांघृतभीतोदंपतीरितिवक्ष्यमाणस्यत्र्यहउपपूर्वकवसतेःस्त्रीयश्च
नपरत्वेसाधकस्यसत्त्वात्॥तथाचदर्शेष्ट्याश्वेकपक्ष्येरतिरुक्त्यातद्वन्निमूल
कपालेनपुरोडाशेन॥विष्णुमेतराज्येनचतुर्होतृहोत्रेणइंद्राग्नीद्वादशकपालेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रोक्षेन्नोहयश्येरतिचसंकल्प्य॥अध्वर्युर्यजमानोवा॥अन्वाधानाख्यंकर्मकुर्या
त॥तद्यथा॥षट्समिधोगृहीत्वा॥पंचदशोवज्रः॥व्रीहिभिर्याजः॥ममाग्नेपक्षैः
॥उत्तमेकालेव्रतोपायनंभवत्वन्वाहार्यो दक्षिणा॥येकेचनवैकल्पिकपदार्थास्तेम
यार्ऋत्विक्प्रत्ययेनावधारिताः॥तेनिश्चिसान्वाधानंकरोति॥ममाग्नेवर्चोवि
हवेष्वस्तुवयंत्वेधानास्तन्वंपुषेम॥महेनमंतांमहिनाभतस्त्वस्त्वाध्यक्षेणपृत
नाजयेमि॥मंत्रेणागृहीतसमिल्षड्मध्येएकांसमिधमाहवनीयेप्रक्षिप्यततोद्वितीं
यांतूष्णींतत्रैवोत्तरतःप्रक्षिपति॥एवंगार्हपत्यदक्षिणाग्न्योःमंत्रेणैकांतूष्णींद्वितीयां
क्षिपति॥ततोस्रिरवावर्जनपूर्वंकेशश्मश्रुवपनंकरोतियजमानः॥अथचंद्रक्षयः॥प
रमक्षयस्तुचतुर्दश्यष्टमीसंयुक्तभवतिअमावास्यासप्तमीसंयुक्तपर्यंतंतिष्ठति॥एवंचका
लिकादृसंबंधेनचंद्रीयपरमक्षयविशिष्टत्रैधाविभक्तत्वतीयोरूपापराण्ह
कालेपंडपित्रयज्ञारंभेहविर्दद्यात्पंचमानरविनिष्कर्षः॥तस्मिन्क्षीणेदद्यातीति
शब्दैः॥क्षीणेराजनिरुस्यतइतिस्मृतेश्च॥अन्यथायजमानदुर्बलपितॄणांश्रव

॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तरदेवैः साकं कलहकारी स्यात्॥ कुतश्चिच्चेदुच्यते॥ देवान्नभूतचंद्रीयद्वितीयक
लोपत्तेः॥ चतुर्दश्यष्टमेभागे क्षीणो भवति चंद्रमाः॥ अमावास्यं ह्यमें शेतुपुनः किल
भवेदणुरितिस्मृतेः॥ चंद्रीयपरमक्षयविशिष्टत्रयोदशीपराह्णकालेपिंडपित्र
यतंकरोतिचयथासूत्रं॥ चंद्रीयपरमक्षयश्चथ्रुवस्यचयश्चतत्पंचदशकलाश्च्य
एं॥ ध्रुवास्यकलामात्रावशिष्टत्वमितियावत्॥ सच॥ ततोदृपतीअहनिमांसमै
थुनवर्जनपूर्वकंसर्पिर्बहुलंशास्यामश्नतमश्नीतः॥ नचदृपसोःपर्वसंध्यहोरात्रे
मैथुनवर्जनस्यस्मसैवलाभात्पुनरमावास्यायांतयोरहर्मैथुनवर्जनोक्तिरसंगते
रितिवाच्यं॥ स्मार्तस्यपर्वसंबंधिमैथुनवर्जनस्यदर्शपौर्णमासोप्रयतंगभूत
स्यभ्रंसौत्रप्रायश्चित्तेरभावेनस्मार्तप्रायश्चित्तस्यैवानुष्ठेयत्वात्॥ अमावास्या
संबंधिअहर्मैथुनवर्जनस्यदर्शपौर्णमासांगभूतस्याभ्रंशेचसौत्रस्यैवप्रायश्चि
त्तस्यानुष्ठेयत्वेनविशेषात्॥ अमावास्यासंबंधहर्मैथुनवर्जनोक्तेरावश्यकत्वा
त्॥ एतच्चकर्कभाष्यादौस्पष्टंबोध्यं॥ यदृचंदृपसोः॥ जायायाः॥ पुंसुवा॥ बुभुक्षा
स्मान्नदा + शेषस्तमाप्तिपंक्तौ॥ अमावास्यासूपत्तिसंबंधेचंद्रीयपरमक्षयविशिष्टपराह्णकालस्यसत्वात्॥ समाप्तं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आरण्यकफलेन फानसादिना तृणधान्यादिनावा बुभुक्षाक्षमनीपा॥ततः शुक्ल
प्रतिपदि यथाकालं प्रातरग्निहोत्रंहुत्वा यथाकालमावस्थ्यहोमंचरित्वा॥इत्यको
लोसंकीर्य॥ॐतत्सत्परमेश्वरप्रीत्यर्थं दर्शेष्ट्यावंयंसचोयक्ष्यामहे॥तत्र भूपतेभु
वनपतेमहतोभूतस्यपते ब्रह्माणंवेदत्रयप्रतिपाद्यकर्मसंस्थासनेप्राङ्मुखोपविष्टं
ब्राह्मणंऋत्विजंत्वां॥स्यासनेउदङ्मुखोपविष्टाःयजमानाःवयंवृणीमहे॥इति
ब्रह्मवरणंकृत्वा॥यथासंप्रदायंब्रह्मग्रहणंकुर्यात्॥अयंचप्रकारः अहःपक्षे॥
सपःपक्षेतुशुक्लप्रतिपदिपूर्ववत्सचोपक्ष्यामहे इतिसंकल्प्य यथोक्तविधिनान्या
धानंचरित्वाग्नेश्चावर्डकेशश्मश्रुवपनंसपाद्यस्नात्वापूर्वाह्णेपिंडपित्तय
ज्ञंचरित्वा ब्रह्मवरणादिब्रह्मग्रहणांतंयथासंप्रदायंकुर्यात्॥इतिबोध्यं॥पुनरमा
वास्यादिविधौ॥पूर्णिमेतिवक्ष्यति॥तत्रप्रारंभकक्रतुपकालप्रभृत्यपरा
कालाद्व्याप्तिकासपूर्णमावास्या॥चतुर्दशीसंबंधिद्वयामिश्रितात्यामावास्या
सर्विका॥संमिश्रायाचतुर्दश्याअमावास्याभवेत्क्वचित्॥सर्विकांतांविदुःकेचित्ग
ताश्यामितिचापरे॥तत्कामायनोक्तेः॥तत्रसंपूर्णमावास्यायांपिंडपित्तयज्ञदर्शौनसंदेहः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यिजुहोमिस्वाहा॥भुवोयजूꣳषिसवयिजुहोमिस्वाहा॥स्वरःसामानिसवयिजुहोमिस्वाहा॥भूर्भुवःस्वरथर्वाङ्गिरस स्तिं
षिंतवयिजुहोमिस्वाहा॥नाभत्यागः॥इतिमेधाजननं॥ततःकुमारमुष्णीषिणंनाभिरद्भिःस्नापयति॥क्षेत्रियैत्वानिर्ऋत्यै
त्वाजुहोमुंचामिवरुणस्यपाशात्॥अनागसंब्रह्मणेत्वाकृणोमिशिवेनेद्यावापृथिवीउभेइमे॥शंनेअग्निःसहाद्भिर
स्तुशंद्यावापृथिवीसहौषधीभिः॥शमंतरिक्षꣳसहवातेननेशंनेचतस्रःप्रदिशोभवंतु॥सूर्यस्तंतमसोग्नात्त्वा
यद्देवाअमुंचन्नघ्न्येनसः॥एवमहमिमंक्षेत्रियाज्जामिदासꣳसाजुहोमुंचामिवरुणस्यपाशात्॥ततःकुमारंमा
तुरुत्संगेआदधाति॥यादेवीश्चतस्रःप्रदिशोवातपत्नीरभिसूर्योभिचष्टे॥तासोत्वाजरसआदधामिप्रय
क्ष्मएनुनिर्ऋतिंपराचैः॥ततःकुमारमभिमंत्रयति॥मातेपृथिवीरक्षोहिꣳसीर्मायेनुदिनिसारिणी॥प्रिया
मनस्यश्रूयाएधमानास्तेवराइति॥ततःस्त्रूष्णीपक्षालितंदक्षिणंस्तनंसव्यंचमंत्रावृत्यापाययति॥अथै
कुमारोजरोधयतुसर्वमायुरेतु॥नस्मैस्तनंप्रायस्त्रायुःकीर्तिर्वर्चोयशोबलं॥ततःकुमारस्यौत्सुनामव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भप्रयोगे॥ ३॥

ष्यमाणप्रकारेण विधातव्यइदंमातापितरावेवजानीतः अतबंधेअनेनाभिवादनंकारयेत्॥ततोमेधावृ
द्धाउभौस्तनावभिमृशति॥नामयतिनमस्करोति॥यत्रवयंवेदामोयत्रवाभिमृशामसीति॥ततोस्याः शि
रः समीपेउदकपूर्णंकुंभंपिधिमंमुखंनिधायेति॥आपोग्रहेषुजाग्रतयथादेवेषुजाग्रथ॥एवमस्यैसु
प्रजायैजाग्रतेति॥ततोजन्मलग्नेदुष्टस्थानस्थितेग्रहजन्यपीडानिरूपणयेदानपादिकारयेत्॥ततोब्राह्मणै
श्चोगोभूहिरण्यादियथाशक्तिदत्तोगंधादिनासंपूज्यभूयसीदक्षिणांदत्वाशिषोवाचयेत्॥अग्नेतेजस्वि
त्यादिभिर्मंत्रैः॥ततोनालच्छेदनादियथाचारंकुर्यात्॥इदंचरात्रौसंध्ययोर्ग्रहणेजननमरणशौचमध्ये
आशौचांतेवापितस्मिन्नामांतरेगतेपित्र्यादिज्ञातकर्मकुर्यात्॥इतिजातकर्मप्रयोगः॥अथषष्ठीपूजा॥पंचमे ॥३॥
षष्ठेपिचद्दिनेपूर्वरात्रेपिचादिराचम्यदेशकालौसंकीर्त्यसूतिकायाःशिशोश्चसकलारिष्टशांतिद्वाराआयु
रारोग्याभिवृद्धिद्वाराचश्रीपरमेश्वरप्रीत्यर्थंविघ्नेशस्यजन्मदाषष्ठीदेवीजिवंतिकानांचयथामीलितोपचारैः ॥शंकर॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूजनमहंकरिष्ये॥इतिसंकल्प्यपूजितस्थानेपीठादौयथाचारंविघ्नेशादिनावास्यषोऽशोपचारैःपंचोपचारै
र्वापूजयित्वामार्थनांकार्यं॥गौरीपुत्रोयथास्कंदःशिवस्यचेक्षितःपुरा॥तथाममापयंबालःषष्ठिदेवीरक्षितो
नमः॥कार्त्तिकेयमहाबाहोगौरीहृदयनंदना॥कुमारंरक्षभीतिभ्यःपाहिदेविनमोस्तुते॥शांतिस्तुसर्वदे
वानांलोकानांहितकारिणी॥मातर्बालमिमंरक्षमहाषष्ठीनमोस्तुते॥ततःषष्ठीस्कंदभगवतीभ्यःमाषभक्तब
लिंसमर्पयामि॥इतिबलिंदत्वाब्राह्मणानांधनांबूलोदक्षिणाहिम्निःसंपूज्याशिषोवाचयेत्॥स्वसंबंधिबांधवा
हिम्निःसहअपूपादिम्निःखाद्यादिर्भक्षणंकुर्यात्॥अभ्यंगोचमध्येप्रथमषष्ठदिनादिनेषुनाशौचदोषः॥
अभ्यंगहर्षेकुर्यात्॥पुरुषश्चस्त्रीहस्तास्त्रियोगिनीकारिष्येस्यांरात्रौजागरणंकुर्यात्॥सूतिकाग्रहंचधूप
मिदीपंशस्त्रमुसलंविभूतिंपुनर्नार्यं॥सर्षपादिंविकीर्यंचअन्यदपिशांतिसूक्तपाठादियथाचारंकार्यं
॥इतिषष्ठीपूजा॥श्रीहरिहरेश्वरार्पणमस्तु॥शाके१८०४चित्रभानुनामसंवत्सरेकार्तिकशुक्लभयोदश्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति ज्ञानकर्मसमुच्चयोगः समाप्तः ॥ श्री ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=08.01.20 12:23
,TRANSFERRED=2020/01/08 at 12:27:03
,PAGES=21
,TYPE=STD
,NAME=S0002489
,Book Name=M-2567-KANVSHAKHTIPUSANP RISHISHT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection